ऋ० १,१६५,६, "करिष्या कर्त्तव्यानि" भा० । द्वितीयास्थाने आट् ।

**करिसुन्दरिका** स्त्री करीव सुन्दरी संज्ञायां कन् । नागयष्टौ वस्त्रशोषणार्थमङ्गणस्थापियन्त्रभेदे हारा० ।

**करिस्कन्ध** न० करिणां समूहः स्कन्धच् । गजसमूहे । हेम० । गजस्य २स्कन्धे पुंन० ।

**करीर** पु० कृ—ईरन् । १घटे मेदि० । २वंशाङ्कुरे अमरः । (बाँशेरकोँड)३अङ्कुरमात्रे भावप्र० वंशमुक्त्वा"तत्करीरः कटुः पाके रसे रूक्षो गुरुः सरः । कषायः कफकृत् स्वादुर्विदाही वातपित्तलः" तद्गुणा उक्ताः । "हिमांशुवंशस्य करीरमेव मां निशम्य किन्नासि फलेग्रहिग्रहा" नैष० । आनिन्यिरे वंशकरीरनीलैः" माघः । "वंशशब्दस्याम्नानताहेतोरलूनतायाः प्रतिपत्त्यर्थत्वान्न पौनरुक्त्यम् अतएव एकार्थं पदम् न प्रयोज्यमित्युक्त्वा करिकलभकर्णावतंसादिषु प्रतिपत्तिविशेषकरेषु न दोष इत्याह वामनः" मल्लि० । तेन वंशाङ्कुरार्थकस्यापि करीरशब्दस्य प्रतिपत्तिविशेषार्थं वंशशब्दप्रयोग इति तत्त्वम् । ३गूढपत्रे मरुभूमिजे उष्ट्रप्रिये वृक्षभेदे भावप्र० । "करीरः कटुकस्तिक्तः स्वेद्युष्णोभेदनः स्मृतः । दुर्नामकफवातामगरशोथव्रणप्रणुत्"भावप्र० ४चीरिकायां झिल्लग्राम् (झिँझिपोका) ५हस्तिदन्तमूले च स्त्री उणा० । अस्य प्रस्थशब्देन समासे करीरप्रस्थे कर्क्यादि० नाद्युदात्तता । मध्वा० चतुरर्थ्यां मतुप् मस्य वः । करीरवत् तत्सन्निकृष्टदेशादौ त्रि० स्त्रियां ङीप् ।

**करीरकुण** न०करीरस्य पाकः पील्वा०पाके कुणच् । तत्पाके

**करीरिका** स्त्री करीरमिवाकारोऽस्त्यस्य ठन् । हस्तिदन्तमूले त्रिका० ।

**करीरी** स्त्री कृ—ईरन् गौरा० ङीष् । चीरिकायां (झिँजिपोका) १झिल्लग्राम् २गजदन्तमूले च मेदि० ।

**करीष** पुंन० । कृ—ईषन् । १शुष्कगोमये (घुटिया । "करीषमिष्टकाङ्गारान् शर्करा वालुकास्तथा" मनुः । २पशुपुरीषमात्रे च "उच्छुष्ककरङ्गपुरीषपांशुला" कादम्ब० । करीषाग्निः (घुटेर आगुन) ।

**करीषगन्धि** पु०करीषस्यगन्ध इव गन्धोऽस्य इत् समा० । करीषतुल्यगन्धयुक्ते तस्यापत्यमण् स्त्रियां ष्यङ् कारीषगन्ध्या तदीयस्त्र्यपत्ये । तस्याः पुत्रपतिशब्दाभ्यां समासे सं प्र० दीर्घस्य । कारीषगन्धीपुत्रः कारीषगन्धीपतिः एवं परमकारीषगन्धीपुत्र इत्यादि उपसर्ज्जने तु न अतिकारीषगन्ध्यापुत्र इत्याद्येव सि०कौ० ।

**करीषङ्कषा** स्त्री करीषं कषति हिनस्ति कष-खच् मुम् च । वात्यायाम् तस्याः गोमयशोषणात्तथात्वम् ।

**करीषिन्** त्रि० करीषस्य देशः पुष्करा० इनि न मतुप् । १करीषयुक्तदेशे स्त्रियां ङीप् । करीषमाश्रयत्वेनास्त्यस्याः इनि ङीप् । गोमयाधिष्ठातृदेव्यां २लक्ष्म्याम् स्त्री । "गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्"श्रीसूक्तम् ।

**करुण** त्रि० करोति मनः आनुकूल्याय कृ—उनन् । दयायुक्ते २रसभेदे पु० तल्लक्षणाद्युक्तं सा० द० यथा "इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत् । धीरैः कपोतवर्णोऽयं कथितो यमदैवतः । शोकोऽत्र स्थायिभावः स्याच्छोच्यमालम्बनं मतम् । तस्य दाहादिकावस्था भवेदुद्दीपनं पुनः । अनुभावा दैवनिन्दा भूपातक्रन्दितादयः । वैवर्ण्योच्छ्वासनिश्वासस्तम्भप्रलपनानि च । निर्वेदमोहापस्मारव्याधिग्लानिस्मृतिश्रमाः । विषादजडतोन्मादचिन्ताद्या व्यभिचारिणः" ।

शोच्यं विनष्टबन्धुप्रभृति । यथा राघवविलासे । "विपिने क्व जटानिबन्धनं तव चेदं क्व मनोहरं वपुः । अनयोर्घटना विधेः स्फुटं ननु खड्गेन शिरीषकर्त्तनम्" । अत्र हि रामवनवासजनितशोकार्त्तस्य दशरथस्य दैवनिन्दा । एवं बन्धुवियोगविभवनाशादावप्युदाहार्य्यम् । परिपोषस्तु महाभारते स्त्रीपर्वणि द्रष्टव्यः । अस्य करुणविप्रलम्भाद्भेदमाह । शोकस्थायितया भिन्नो विप्रलम्भादयं रसः । विप्रलम्भे रतिः स्थायी पुनः सम्भोगहेतुकः"३परदुःखहरणेच्छायां दयायां स्त्री । "अहो विधे त्वां करुणा रुणद्धि नः" नैष० । "प्रायःसद्योभवति करुणावृत्तिरार्द्रान्तरात्मा"मेघ० । "करुणाविमुखेन मृत्युना"रघुः । दुःखितेषु दया करुणा साऽस्त्यस्य अर्श०अच् विषयत्वेन । ४करुणाविषये दीने त्रि० । "अनिशं निजैरकरुणः करुणम्" माघः । "करुणं दीनं यथा तथेति"मल्लि० । "अनुरोदितीव करुणेन पत्त्रिणां विरुतेन"माघः । "विरुतैः करुणस्वनैरियम्" कुमा० । (करलहनेवु)५वृक्षभेदे पु० त्रिका० । "पिकात् वने शृण्वति भृङ्गहुङ्कृतैर्दशामुदञ्चत्करुणे वियोगिनाम्" नैष० । "करुणस्य फलं श्लेष्मवातामभेदसां पुनः ; नाशनं पित्तकोपस्य शमनं प्ररिकीर्त्तितम्"इति तत्फलगुणाश्च वैद्यकोक्ताः । ६बुद्धभेदे पु० त्रिका० । ७परमेश्वरे ८भूताभयकारके परिव्राजके पु० शब्दचि० ।

**करुणामल्ली** स्त्री करुणा करुणाविषयः मल्ली । १नवमल्लिकायाम् शब्दच० । तत्पुष्पस्यातिसुकुमारत्वात् करुणावि-